## न लुट्। (२९/३९३६)

[1]पूर्वेण अतिप्रसक्ते प्रतिषेध आरभ्यते। [2]लुडन्तं [3]नानुदात्तं भवति। श्वः कर्ता। श्वः कर्तारौ[4]। मासेन कर्तारः। [5]तासेः परस्य लसार्वधातुकस्य अनुदात्तत्वे सति सर्व[6]तासिरेव उदात्तः। [7]यत्र तु टिलोपः, तत्र उदात्तनिवृत्तिस्वरो भवति ॥

## निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्। (३०/३९३७)

न इति वर्तते। यत् यदि हन्त कुवित् नेत् चेत् चण् कच्चित् यत्र इत्येतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवति। यत्–यत् करोति। यत् पचति। यदि – यदि करोति। यदि पचति। हन्त – हन्त करोति। नेत् – 'नेज् [8]जिह्मायन्त्यो नरकं पताम' (ऋ. खि. ३.२२)। चेत् – स चेद् भुङ्क्ते। स चेद् अधीते। चण् – णिद्विशिष्टोऽयं चेदर्थे वर्तते। अयं च मरिष्यति। अयं चेन्मरिष्यति इत्यर्थः। समुच्चयादिषु तु यः चशब्दः, तेन योगेन विधिरयं न भवति। कच्चित् – कच्चिद् भुङ्क्ते। कच्चिद् अधीते। यत्र – यत्र भुङ्क्ते। यत्र अधीते। निपातैः इति किम्? यत् कूजति शकटम्। गच्छत् कूजति शकटम् इत्यर्थः। इणः शतरि रूपमेतत्। युक्तम् इति किम्? 'यत्र क्व च ते मनो दक्षं दधस उत्तरम्' (ऋ. ६. १६. १७)॥

## नह प्रत्यारम्भे। (३१/३९३८)

नह इत्येतेन युक्ते प्रत्यारम्भे[9] तिङन्तं नानुदात्तं भवति। चोदितस्या[10]वधीरणे उपालिप्सया प्रतिषेधयुक्तः [11]प्रत्यारम्भः क्रियते। नह भोक्ष्यसे। नह अध्येष्यसे। प्रत्यारम्भे इति किम्? नह वै तस्मिंश्च लोके दक्षिणामिच्छन्ति ॥

## सत्यं प्रश्ने। (३२/३९३९)

सत्यम् इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रश्ने[12]। सत्यं भोक्ष्यसे। सत्यम् अध्येष्यसे। प्रश्ने इति किम्? 'सत्यं वक्ष्यामि नानृतम्' (अ. वे. ४. ९. ७)॥

## अङ्गाप्रातिलोम्ये। (३३/३९४०)

अङ्ग इत्यनेन युक्तं तिङन्तं अप्रातिलोम्ये गम्यमाने नानुदात्तं भवति। अङ्ग कुरु। [13]अङ्ग पच। अङ्ग पठ। अप्रातिलोम्ये इति किम्? अङ्ग कूज ३ वृषल, इदानीं ज्ञास्यसि जाल्म। कूजनमनभिमतमसौ कुर्वन् प्रतिलोमो भवति[14]॥

1. पूर्वेण नास्ति इ. ह. 2. अतिङन्तात् इत्यधिकम् क. 3. तिङन्तम् इत्यधिकम् इ. ह. 4. श्वः कर्तारः इत्यधिकम् क. इ. ड. 5. तासः इ. 6. तासेः एव पूर्वं उदात्तः क, तासेरेव उदात्तत्वं भवति इ. 7. यत्र लुडन्ते टिलोपो नास्ति तत्र ड. इ. 8. जिह्मायन्तो मुद्रितः पाठः. 9. विषये इत्यधिकम् ब. क. इ. 10. अवधारणे क.ड. 11. आरम्भः इत्यधिकम् क. ड़. इ. 12. अर्थे इत्यधिकम् ह, स चेत् सत्यशब्दः वर्तते इत्यधिकम् ब. क.ड.इ. 13. अङ्ग पच नास्ति ड. 14. प्रातिलोम्यं प्रतिकूलकारित्वम् इत्यधिकम् ड.